योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ४८

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

क्रियाविशेषबहुला भोगैश्वर्यहताशयाः ।

नापेक्षन्ते यदा सत्यं न पश्यन्ति शठास्तदा ।। १

ये तु पारं गता बुद्धेरिन्द्रियैर्न वशीकृताः ।

त एनां जागतीं मायां पश्यन्ति करबिल्ववत् ।। २

तुच्छां तां जागतीं मायां दृष्ट्वा जीवो विचारवान् ।

अहंकारमयीं मायां त्यजत्यहिरिव त्वचम् ।। ३

असक्ततां ततोऽभ्येत्य पुना राम न जायते ।

क्षेत्रेष्वपि चिरं तिष्ठन्बीजं दग्धमिवाग्निना ।। ४

आधिव्याधिपरीताय प्रातर्वाद्य विनाशिने ।

प्रयतन्ते शरीराय हितमज्ञास्तु नात्मने ।। १

त्वमप्यज्ञवदज्ञस्य शरीरस्य समीहितम् ।

मा संपादय दुःखाय भवात्मैकपरायणः ।। ६

श्रीराम उवाच ।

दाशूराख्यायिकेवेयं सुखसंसारचक्रिका ।

कल्पनारचिताकारा वस्तुशून्येति किं प्रभो ।। ७

श्रीवसिष्ठ उवाच ।

जगन्मायास्वरूपस्य वर्णनाव्यपदेशतः ।

दाशूराख्यायिका राम वर्ण्यमानां मया शृणु ।। ८

अस्त्यस्मिन्वसुधापीठे विचित्रकुसुमद्रुमः ।

मागधो नाम विख्यातः श्रीमाञ्जनपदो महान् ।। ९

कदम्बवनविस्तारलीलावलितजङ्गलः ।

विचित्रविहगव्यूहसर्वाश्चर्यमनोहरः ।। १०

सस्यसंकटसीमान्तः पुरोपवनमण्डितः ।

कमलोत्पलकह्लारपूर्णसर्वसरित्तटः ।। ११

उद्यानदोलाविलसल्ललनागेयघुंघुमः ।

निशोपभुक्तकुसुमनीरन्ध्रविशिखावनिः ।। १२

तत्रैकस्मिन्गिरितटे कर्णिकारसमाकुले ।

कदलीखण्डनीरन्ध्रनीपगुल्मविराजिते ।। १३

पुष्पौघस्फूर्जदनिले केसरारुणधूलिनि ।

कारण्डवकृतारावे रसत्सरससारसे ।। १४

तस्मिन्नगवरे पुण्ये विचित्रविहगद्रुमे ।

कश्चित्परमधर्मात्मा मुनिरासीन्महातपाः ।। ३

दाशूरनामा महता तपोयोगेन संयुतः ।

कदम्बपृष्ठवास्तव्यो वीतरागो महामतिः ।। १५

श्रीराम उवाच ।

असौ तपस्वी भगवन्विपिने केन हेतुना ।

कथं चाप्यवसत्पृष्ठे कदम्बस्य महातरोः ।। १७

श्रीवसिष्ठ उवाच ।

शरलोमेति विख्यातः पिता तस्य बभूव ह ।

रामाऽपर इव ब्रह्मा तस्मिन्नेवावसद्गिरौ ।। १८

तस्यासावेकपुत्रोऽभूत्कचो देवगुरोरिव ।

तेन सार्धं स पुत्रेण नीतवाञ्जीवितं वने ।। ११

अथासौ शरलोमात्र भुक्त्वा युगगणं ययौ ।

त्यक्तदेहः सुरागारं मुक्तनीडः खगो यथा ।। २०

एक एव वने तस्मिन्दाशूरः प्ररुरोद ह ।

दशापनीतपितृकः करुणं कुररो यथा ।। २१

मातापितृवियोगेन शोकसंतापिताशयः ।

म्लानिमभ्याययौ नूनं हेमन्त इव पङ्कजम् ।। २२

बालोऽसावतिदीनात्मा वनदेवतया वने ।

इत्थमाश्वासितो राम तदाऽदृश्यशरीरया ।। २३

ऋषिपुत्र महाप्राज्ञ किमज्ञ इव रोदिषि ।

संसारस्य न कस्मात्त्वं स्वरूपं वेत्सि चञ्चलम् ।। २४

सर्वदैवेदृशी साधो संसारे संसृतिश्चला ।

जायते जीव्यते पश्चादवश्यं च विनश्यति ।। २५

यद्यत्किंचिद्दृश्यदृशि ब्रह्मादिकमिदं मुने ।

गन्तव्यस्तेन सर्वेण विनाशो नात्र संशयः ।। २६

तदर्थं मा कृथा व्यर्थं विषादं मरणे पितुः ।

अवश्यभाव्यस्तमयो जातस्याहर्षतेरिव ।। २७

अशरीरामिति श्रुत्वा गिरमारक्तलोचनः ।

धैर्यमासादयामास शिखण्डी स्तनितादिव ।। २८

उत्थायावश्यकं कृत्वा पाश्चात्यं पितुरादरात् ।

चकार तपसे बुद्धिं दृढामुत्तमसिद्धये ।। २९

ब्राह्मेण कर्मणा तस्य विपिने चरतस्तपः ।

अनन्तसंकल्पमयं श्रोत्रियत्वं बभूव ह ।। ३०

अज्ञातज्ञेयबुद्धेस्तु श्रोत्रियस्य तया तया ।

न विशश्राम चेतोऽस्य पवित्रेऽपि धरातले ।। ३१

केवलं सर्वमेवेदमपि शुद्धं धरातलम् ।

अशुद्धमिव पश्यन्स न रेमे क्वचिदेव हि ।। ३२

अथ संकल्पयामास स्वसंकल्पनयैव सः ।

वृक्षाग्रमेव संशुद्धं स्थितिस्तत्रोचिता मम ।। ३३

तदिदानीं तपस्तप्स्ये तपसा येन शाखिषु ।

खगवत्स्थितिमाप्नोमि शाखासु च दलेषु च ।। ३४

इति संचिन्त्य संज्वाल्य हुताशमतिभास्वरम् ।

जुहाव तस्मिन्प्रोत्कृत्त्य मांसं स्वस्कन्धभित्तितः ।। ३५

अथ गीर्वाणवृन्दस्य समग्रा गलभित्तयः ।

मन्मुखत्वेन मा यान्तु विप्रमांसेन भस्मताम् ।। ३६

इति संचिन्त्य भगवान्सप्तार्चिस्तस्य देवता ।

पुरो बभूव दीप्तांशुर्दीप्तांशुर्वाक्पतेरिव ।। ३७

उवाच वचनं धीरं कुमाराभिमतं वरम् ।

गृहाण स्थापितं साधो कोशाकाशान्मणिं यथा ।। ३८

इत्युक्तवन्तमनलमर्घपुष्पेण शोभिना ।

संपूज्य स्तुतिवादेन प्राह विप्रकुमारकः ।। ३९

भगवन् भूतपूर्णाया भुवः पावनमण्डलम् ।

नाप्नोमि तेन वृक्षाणामुपरि स्थितिरस्तु मे ।। ४० ।

इत्युक्ते मुनिपुत्रेण सर्वदेवमुखं शिखी । ।

एवमस्तु तवेत्युक्त्वा जगामान्तर्द्धिमीश्वरः ।। ४१

तस्मिन्नन्तर्हिते देवे क्षणात्सान्ध्य इवाम्बुजे ।

पूर्णकामः कुमारोऽसौ पूर्णेन्दुरिव चाबभौ ।। ४२

अधिगताभिमताननमण्डल-

द्युतिभरेण जहास स तुष्टिमान् ।

शशिनमाप्तकलाकुलमम्बुजं

विकसितं च सितस्मितशोभिना ।। ४३

इत्यार्षे श्रीवसिष्ठमहारामायणे वा० दे० मो० स्थितिप्रकरणे दाशूरो० दाशूरवरप्रदानवर्णनं नामाष्टचत्वारिंशः सर्गः ।। ४८ ।।